# Malahanikareshvara Ashtakam

# मलहानिकरेश्वराष्टकम्

## Document Information

Text title : Malahanikareshvara Ashtakam

File name : malahAnikareshvarAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : shrIvidhushekharabhAratImahAsvAmi

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# मलहानिकरेश्वराष्टकम्

तुङ्गोत्तमाङ्गविलसन्मृगभृत्कलाय
शृङ्गाद्रिवासरसिकाय महेश्वराय ।
शीतांशुभास्करकृशानुदृशे भवानी-
भर्त्रे नमोऽस्तु मलहानिकरेश्वराय ॥ १॥

शर्वाय कश्यपमुनीन्द्रकुलाब्धिचन्द्र-
श्रीमद्विभाण्डककृताग्र्यतपःफलाय ।
श्रीऋष्यशृङ्गमुनिसेव्यपदाम्बुजाय
नित्यं नमोऽस्तु मलहानिकरेश्वराय ॥ २॥

शृङ्गाद्रिदेशिकवरेण्यसुपूजिताय
नम्राखिलेष्टपरिपूरणतत्पराय ।
अस्तोकदुःखकृदवग्रहवारकाय
नित्यं नमोऽस्तु मलहानिकरेश्वराय ॥ ३॥

सच्चित्सुखाभिधगुरुप्रवरेण वामे
संस्थापिताद्रिसुतया सह विष्टपानि ।
गोपायते नृपकदम्बकसेविताय
पित्रेऽस्तु तारकजितः प्रणतिर्भवाय ॥ ४॥

श्रीमन्नृसिंहगुरुणाभिनवेन सद्यः
संस्थापितं निजतनूजमचिन्त्यशक्तिम् ।
स्तम्भस्थितं प्रथमपूज्यमवेक्ष्य नित्यं
मोमुद्यमानहृदयाय नमश्शिवाय ॥ ५॥

नित्योत्सवाय निगमागमतत्त्वविद्भिः
सङ्गीयमानविभवाय निरञ्जनाय ।
निर्वाणदाय निजभक्तततेश्च नाना-
मोहान्धकारमिहिराय नमश्शिवाय ॥ ६॥

पद्मोद्भवाब्जनयनप्रमथाधिपात्मा
सर्गस्थितिप्रलयकृत् गुणयोगतो यः ।
आनन्दबोधपरिपूर्णसदात्मकाय
तस्मै शिवाय नतिरस्तु गुणातिगाय ॥ ७॥

यस्मिन् विभाण्डकमुनिर्निजबोधयुक्तः
एकीबभूव विनिवृत्तसमस्तबन्धः ।
तस्मै सदा श्रुतिशिरःप्रतिपाद्यजीव-
ब्रह्मैक्यबोधनरताय नमश्शिवाय ॥ ८॥

इति दक्षिणाम्नाय-शृङ्गेरी-शारदापीठाधीश्वर-जगद्गुरु-शङ्कराचार्य-
श्रीश्रीश्रीभारतीतीर्थ-महास्वामि-करकमलसञ्जातैः
जगद्गुरु-श्रीश्रीविधुशेखरभारती-महास्वामिभिः विरचितं
मलहानिकरेश्वराष्टकं सम्पूर्णम् ।

*Malahanikareshvara Ashtakam*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*